वाराहीनामसहस्रम्

४४७६

[illegible]

वासही सरकन्नाम

वदले श्रीसरकारीदे

[illegible]

वा॰स॰ ॐ श्रीगणेशाय नमः ॥ देव्युवाच ॥ श्रीवाडवकारुण्यसिंधोदी
१ नबंधो जगत्पते भक्तिमुक्तिप्रद सर्वाग परात्पर नर प्रभो १
कृतांजलिपुटा भीता पृच्छाम्येकं दयानिधे: आद्याद्याय चि
त्स्वरूपाद्या निर्विकारा निरंजना २ बोधातीता ज्ञानगम्या
कूटस्था नंदविग्रहा अग्राह्यातीन्द्रिया शुद्धा निरीहा स्वा
वभासिका ३ गुणातीता निष्प्रपंचा ह्यवाङ्मनसगोचरा च
प्रकृतिर्जगदुत्पत्तिस्थिति संहारकारिणी ४ रक्षणार्थं जग
तो देवकार्यार्थवासुरद्विषां नानारूपधरा सा देवि तत्र तत्र का
र्यैकसाधकं ५ तत्र मध्ये धारणार्था पृथग्वस्तु विस्तार हेतवे
विद्युत्केश हिरण्याद्य बलाकादि वधाय च ६ आविर्भूत
वयाशक्ति श्रीरामद्राक्षरूपिणी वाराही विकटाकारा दानवा
सुरनाशिनी ७ सद्यः सिद्धिकरी देवी घोराद्घोरतरा शिवा
१ राम

तस्याः सहस्रनामाख्यंस्तोत्रंमे समुदीरय ८ कृपाले

शोऽस्तिमयिचेज्ज्ञाप्यंमेयदिवाभवेत् अनुग्राह्यायद्यहं

स्यांतदावददयानिधे ९ ईश्वरउवाच साधुसाधुवरा

रोहेधन्याबहुमतासिमे शुश्रूषयासमुत्पन्नाभक्तिःश्रव

चितातव १० सहस्रनामवाराह्याःसर्वसिद्धिविधायिनः

तवचेन्नप्रवक्ष्यामिकस्यान्यस्यवदाम्यहं ११ किंतुगोप्यंप्र

यत्नेनसंरक्ष्यंप्राणतोपिच विशेषतःकलियुगेनदेयं

यस्यकस्यचित् १२ सर्वेन्यथासिद्धिभाजोभविष्यंतिवरानने

॥ ॐअस्यश्रीवाराहीसहस्रनामस्तोत्रस्यमहादेवऋषि

रनुष्टुप्छंदः वाराहीदेवता ग्लौंबीजं क्रोंशक्तिः हुंकी

लकं ममसर्वार्थसिद्ध्यर्थेजपेविनियोगः ॥ ॐवाराहीवाम

नीवामावगलावासवीवसुः वैदेहीवीरसूर्बालावरदावि

वा.स.
२

सुवल्लभा १३ वंदिता वसुदा वल्पा व्याप्ता व्यासा वंचनी वला वसु
धरा वीतिहोत्रा वीतरागा विहायसी १४ खर्वा खनिप्रिया का
म्या कमला कांचनी रमा धः म्रा कपालिनी वामा कुरुकुल्पा
कलावती १५ याम्या ज्येयी धरा धन्या धमनी ध्यानिनी ध्रुवा
धृतिर्लक्ष्मीर्जया तुष्टिः शक्तिर्मेधा तपस्विनी १६ वेधा दया कृ
पा कांतिः स्वाहा शांतिः क्षमा रतिः लज्जा मतिः स्मृतिर्निद्रा तं
द्रा गौरी शिवा स्वधा १७ चंडी दुर्गा अभया भीमा भाषा भामा भ
यानका भूदारा भयहाऽभीरुर्भैरवी भंगुरा भटी १८ घुर्घु
रा घोषणा घोरा घातिनी घोणा संयुता घना घना घर्घरा च
घटणा युक्ता घनाघिनी १९ पूर्वाग्नायी या नुया याम्या व य
सुत्तर वारुणी ऐशान्यूर्ध्वाधः स्थिता च पृष्ठदा ताम्रपा मगा
२० हृन्नाभिब्रह्मरंध्रार्क वर्गी पाताल भूमिगा २०

राम
२

श्री ह्रीः कीर्त्तिर्गतिः प्रीतिर्धीर्गीः कोशात्तपाप्यया ऋग्यजुः
सामरूपा च परापोत्रिपुंड्रवरा २१ गदासिशक्तिचापेषु
शूलचक्रर्ष्टिधारिणी जरती युवती बाला चतुरंगबलो
त्कटा २२ सत्यात्परा निधिर्नेत्री धात्री पोत्री परा पटुः क्षेत्र
ज्ञा कंपिनी ज्येष्ठा दुराधर्षा धुरंधरा २३ मालिनी मानि
नी माता माननीया मनस्विनी महोत्कटा मन्युकरी मनु
रूपा मनोजवा २४ मेदस्विनी मद्यरता मधुपी मंगलाम
रा माया ऽमता ऽमया हरी मृडाणी महिला मतिः २५
महादेवी मोहहरी मंजुर्मृत्युंजया ऽमला मांसला ऽमा
नवा ऽमूला महारात्रिर्मदालसा २६ मृगांका मेनका मा
न्या महिषघ्नी मदंतिका मूर्छा मोहा मृषा मोघा मदस्थ
सुर्मला घना २७ सिंहर्क्षमहिषव्याघ्रमृगक्रोडाननाना

का.स.
३

धुनी धोरणी धारिणी धेनुर्धरित्री धावनी धवा २८ धर्मध्व
जा ध्याननपरा धनधान्यधरा ऽदा पापदैत्यरिपुव्याधिना
शिनी सिद्धिदायिनी २९ कलाकाष्ठास्वपापतारस्तुरिस्वा
सरूपिणी समरूपा भुजा रौद्री राधाराधारमारणिः ३०
रामा रतिप्रिया रुष्टा रक्षिणी रविमध्यगा रजनी रमणी
रेवा रंकिणी रजनी रथिः ३१ रोधा रोषवती रुष्टा करीरा
रजनी रता रुष्टा रूपवती रम्या रुद्राणी रणपंडिता ३२
गंगा च यमुना सरस्वती च सरयूर्मधुः गंडकी तुंगभद्रा च
कावेरी कौशिकी पटुः ३३ खट्वांगिनी सदाचारा सहस्त्रात्ता
प्रतर्दना सर्वनाशकरी शस्त्री जटाधारिणी घोरदा ३४
पावनी सौरभी कुब्जा वक्रतुंडा वधोद्यता चंद्रापीडा वेदवेद्या
सर्पिणी नीललोहिता ३५ ध्यानातीता ऽपरिच्छेद्या मृत्युरूपा

राम
३

त्रिवर्गदा ॥ अरूपा बहुरूपा च नानारूपाऽसितानना ३६ वृषा
कपिर्वृषारूढा वृषेशी वृषवाहना वृषप्रिया वृषावर्त्ता वृ
षपर्वा वृषाकृतिः ३७ कोदंडिनी नागचूडा चक्षुष्या पर
मार्थिका दुर्वासा दुर्गहा देवी दुरावासा दुरारिहा ३८ दुर्गा
पुधा दुःखहंत्री दुराराध्या दवीयसी दुरावासा दुष्प्रसहा दुष्प्र
कंपा दुरूहिणी ३९ सुकेशी श्यामणी श्यामा मृगव्याधार्क
ताग्विनी उग्रा तार्द्दी पाशुपती कौणपी कुणपाशना ४०
कपर्द्दिनी कामगमा कमनीया कलोज्वला कासारा कनकाभा
चकंबुकंठी हृतानगमा ४१ कर्कशा कारणं कांता कल्पा क
ल्पांतकानका श्मशाननिलया निम्ना गजारूढा गजापहा
४२ भस्मप्रिया भस्मशया स्वर्भानुः कालवंचनी शाखावि
शाखयोगोशखा सुशाखा शोषकाविनी ४३ व्यंगाङ्गगारगा

नंगा नीलांगाऽनंगरूपिणी सांगोपांगा च सारंगा सुरंगा रंगरं
गिनी ४४ भद्रा सुभद्रा भद्राक्षी सिंहिकी विनिताऽदितिः हृद्या ग
द्या सुपद्या च गद्यपद्यप्रिया प्रसूः ४५ चर्चिका भोगवत्यंबा सा
रसी शवरी नटी योगिनी पुष्कलाऽनंता परा सांख्या शची सती ४६
निम्नगा निम्ननाभिश्च सहिष्णुर्जगती लिपिः दमयंती दमोदं
डी दंडिनी दारदायिका दीपिनी देवनी दात्री दत्त कन्या दरीदर
दाहिनी द्रविणी दर्वी दंडिनी दंडनायिका ४८ दानप्रिया दोषहं
त्री दुःखदारिद्र्यनाशिनी दोषदा दोषकृद्दोग्ध्री दोहदा देविकाऽ
दना ४९ दर्वीकरी दुर्ललिता दोर्युग्माऽद्वयवादिनी चराचराऽनं
त वृष्टिरुन्मत्ता कामलालसा ५० तारिणी तारिका तारा परमा
त्मा ब्जलोचना इंदुर्हिरण्यकवचा व्यवस्था व्यवसायिका ५१
तीव्रानंदा नदी नागी यक्षिणी सर्पिणी वरी सुधा सुरा विश्वस

हासुवीरां गदधारिणी ५२ जननी प्रीतिपा फेरुः शाखाशी सं
संविद्युत्तरा गुप्रमेयारि मथनी पिंगलालिंग धारिणी ५३
चामुण्डा ज्ञावनी हाला वृहज्ज्योति रुरु क्रमः सुप्रनीकाव
मुग्नी वाकल्प वा हाप्रलापिनी ५४ नभस्था माधवीज्येष्ठी शि
शिरा ज्वालिनी रुचिः शुक्ला शुक्रा शुष्का शोकाशुकी भेकी
पिकी वकी ५५ पृषद्श्वा नभोयोनिं सुप्रनीका विभावरी ग
र्विता गुर्विणी गम्या गुरु गुरु नरी गया ५६ गंधर्वी गणिकागुं
जा गारुडी गोपिका गृगा गणेशी गामिनी गंता गोपतिर्गंधि
नी गवी ५७ गर्जिता गानवी गोना गोरक्षा गोविदां गतिः
ग्राथिकी ग्रंथिकृ गोष्ठी गर्भ रूपा गुणैषिणी ५८ पारस्करा पांच
नदा वहुरूपा विरूपिका ऊहा न्यूहा दुरूहा च संमोहा मो
हहारिणी ५९ यज्ञविग्रहिणी यज्ञा यजरूपा यशस्विनी

वा॰स॰
५

अग्निष्टोमो ऽत्यग्निष्टोमो वाजपेयश्चषोडशी ६० पुण्डरीकोऽश्वमेध
श्च राजसूयश्च नाभसी स्विष्टकृद्वसुसोवर्णो गोसवश्च महा
व्रता ६१ विश्वजिद्ब्रह्मयज्ञश्च प्राजापत्यः शिलायवः अश्व
क्रान्तारथक्रान्ता विष्णुक्रान्ताविभावसुः ६२ सूर्यक्रान्ता गज
क्रान्ता बलभिन्नागयज्ञका सावित्रीच धैस्साविश्री सर्वतो
भद्रकारणी ६३ आदित्यामयगोदोहगवामयमृगामया
सर्पामयः कालपिञ्जः कौण्डपायनकाहलौ ६४ अग्नि
चिद्द्वादशाहश्चो पांशुसोमाविदोहनः अश्वप्रतिग्रहो बर्हि
रथ्योऽभ्युदयत्रृका विराट् ६५ सर्वस्वदक्षिणो दीक्षा सोमाख्यः
समिदाह्वयः काठायनश्च गोदोहः स्वाहाकारस्तनूनपात् ६६
दाक्षायणोऽश्वमेधश्चरूपेनो वज्रवपुर्यमः अंगिराः कंकमेरूड
चारायणपरायणौः ६७ ज्योतिष्टोमः कुहूर्दर्शो नंदाख्यः पौ

र्णमासिकः गजप्रतिग्रहो रात्रिः सोमरः शाकलायनः
६८ सौभाग्यहस्तकारीबो वैदलायन रामठाः शोचिष्कारी
नाचिकेतः शांतिकृत् पुष्टिकृत्तथा ६९ वैनतेयोच्चाटनैश्च
वशीकरणमारणे त्रैलोक्यमोहनो वीरः कंदर्प्पवलशातनः
७० शंखचूडो गजच्छायो रौद्रारव्यो विष्णुविक्रमः श्रौषट्
वौषडूषट्कारः पाकसंस्था परिष्क्रुती ७१ चयनो नरमे
धश्वकारी रीरत्न हारिका सौत्रामणीच भारुंडा वार्हस्पत्यो
वलंगमः ७२ प्रचेताः सर्प्पसत्रश्च गजमेधः करंभरः हविः
संस्था सोमसंस्था पाकसंस्था गरुत्मती ७३ स्फ्यासूर्पश्रम
सः स्क्रुक्रुचश्च चोलूखलमेदाणी चषालो मंथानीमेटी यूपः
प्राग्वंश कुंचिका ७४ रश्मिरंशु अदाभ्य वारुणो दोहदः
कुयाग्रंतर्यामो द्रोणकलशौ मैत्रावरुण आश्विनः ७५

वा॰स॰ पत्नी रातखुर्ममधीच हारियोजन एव च प्रतिप्रस्थान स्तु ओचसामि
९ धेनी समित्समा ७६ होनाऽथ ग्रुस्तधोजातो नेतारक्षाचनो
त्रिवा ॥ आग्नी घ्रोऽच्छावाक एव ग्रावस्तु प्रतिहर्तृक: ७७ सुब्र
ह्मण्यो ब्राह्मणा च्छंसी ब्रह्मा मैत्रवारुण: शस्तोता प्रतिप्रस्था
ता यजमानोऽग्नुचित्रिका ७८ ॥ आमिक्षाश्च दध्याज्यं साहव्यं क
मंचरुपय: जुहुश्च स्रुवोपभृ द्रुतात्रयी त्रेतातरास्विनी ७९
पुरोडाश: पशुरुर्वीशधातल्ली ब्रह्मवरिनी ॥ अग्निजिह्वा
दर्भरोमा ब्रह्मशीर्षा महोदरी ८० ॥ अमृतप्राशिकानारायणी
नग्ना दिगंबरा ॐकारिणी चतुर्वेदमयी स्फातिरणुरूपणी ८१
॥ प्रह्लादशालु जारआसन्ता गगनचारिणी भीमवक्त्रा महा
वक्त्रा किर्मीरा ह्रस्वपिंगला ८२ ह्रस्वमस्तीमहामस्ती घोर
मस्तीभयानना घोरानना घोरजिह्वा घोररावा महाव्रता ८३

राम
६

दीप्ता स्याद्दीप्तनेत्रा च चंद्रग्रहरणा जटी सुरभी सौरभेयी च ध्या
या संध्या च मा सता ८५ ह्रीमाहृत्सांवराक्षस्त्रजाङ्गी रूप
वल्लभा त्रासिनी मोहनी देव्या मत्सुरूपा भयावहा न्यभीषणा
दानवेंद्रघ्नी कल्पकर्त्री क्षयंकरी अभया पृथिवी साध्वी के
शिनी व्याधिजन्महा ८६ अक्षोभ्या ह्लादिनी कल्पा पवित्रा रो
पिणी शुभा कन्या देवी सुरादेवी भीमा देवी मदंतिका ८७ शाकं
भरी महाश्वेता धूम्रा धूम्रेश्वरीश्वरी वीरभद्रा महाभद्रा महा
देवी महासुरी ८८ श्मशानवासिनी दीप्ता चितिसंस्था चिति
प्रिया कपालहस्ता खट्वांगी खड्गिनी शूलिनी हली ८९ कांता
रिणी महायोगा योगमार्गा युगाग्रहा धूम्रकेतुर्महा हस्या
युगानां परिवर्त्तिनी ९० अंगारिण्यंकुशकरी घंटाकर्णी
चचर्किणी वेताली ब्रह्मवेताली महावेतालिका तथा ९१

६

रा.स. विद्याराज्ञी मोहराज्ञी महामोहा महोदरी अतंमव्यंमविष्णुश्च
सांख्ययोगसजवोदम: ९२ अध्यात्मंचाधि दैवंचच्चाधिभूतं श
मएवच घोराखविरूपाक्षीशिखिपिच्छध्वजप्रिया ९३
शंखचक्रगदाहस्ता महिषासुरमर्द्दिनी मातंगीमत्तमातंगी
कौशिकीब्रह्मवादिनी ९४ उग्रतेजा: सिद्धसेना जंभनीमो
हिनीतथा जयाचविजयाचैवविनिताकद्रुरेवच ९५ धात्री
विधात्रीविक्रान्ता ध्वस्ताम्मूर्छाचमूर्छिनी दमनीदामिनीदा
म्या छेदिनी तापिनीतपी ९६ वंधिनी वधिनी वध्याबोधा
नीतातुधप्रिया हरिणीहारिणीहंत्री धारिणीधारिणी धरा ९७
विसंभनी संधिनीच संध्या संधिप्रिया महा रेवतीकालक
र्णीच सिद्धिर्लक्ष्मीररुंधती ९८ धर्मप्रियाधर्मरताधर्मिष्ठाधर्म
चारिणी व्युष्टि:ख्याति: सिनीवाली कुहूरनुमतिर्स्थिति: ९९

राम

त्वाष्ट्री वैरोचनी मैत्री नीरजा कैटभेश्वरी भ्रमणी भ्रामणी भ्रा
मा भ्रमरी भ्रामरी भ्रमा १०० निष्कला कलहा नीता कौला
कारकलेवरा विद्युज्जिह्वा वल्कि लिलिनी हिरण्यपातनिपाति
नी १०१ जितकामा कामगमा कोलाकल्याणिनी कला २
प्रधानं तारका तारा तु हिताऽहितभेदिनी २ दुरत्तरा परं
ब्रह्म महोत्ता नामहा हवा वारुणी वरुणी वाणी वीणा वेणी त्रि
हंगमा ३ मोदप्रिया मोदकिनी प्लवनी प्लावनी प्लुतिः अ
जरा लोहिताऽलक्ष्या जातप्रजा विश्वभोजिनी ४ मनो बुद्धिर
हंकारः क्षेत्रज्ञः क्षेत्रपालिका चतुर्वेदा चतुर्भगा चतुरंगा
चरुप्रिया ५ चर्विणी चोरिणी चारी चांगेरी चर्मचारिणी नि
र्लेपा निष्प्रपंचा च प्रशान्ता नित्यविग्रहा ६ स्तव्या स्तवप्रिया व्या
ला गुरुराश्रितवत्सला निष्कलंका निरालंबा निर्द्वंद्वा निष्परि

बा.स. गुह्या ७ निर्गुणा निर्मला नित्या निरीहा निरघा नवा निरिंद्रि
८ या निराभासा निर्मोहा नीतिनायिका ८ निरिंधना निष्कला च
४ लीलाकारा निरामया मुंडा विरूपा विरूपा पिंगलाक्षी गुणोत्त
रा ९ पद्मगर्भा महागर्भा विश्वगर्भा विलक्षणा परमात्मा परे
शानी परा ऽपारा परंतपा: १० संसारहेतु: क्रूराक्षी मूढा मग्ना
मनुप्रिया विषमया दुर्जया दत्ता दनुहंत्री दवानला ११ परब्र
ह्मानंदरूपा सर्वसिद्धिविधायिनी एवमुक्तामरान्तत्रान्मयोद्धृत्य
प्रकाशितं १२ गोपनीयं प्रयत्नेन नाख्येयं यस्य कस्यचित् यदी
च्छसि प्रिये सिद्धिमैश्वर्यं चिरजीविताम् १३ आरोग्यं नृपसम्मा
नं दानान्यस्य कीर्तयेत् नाम्नां सहस्रवाराख्या मया ते समुदीरि
तं १४ य: पठेत् शृणुयाद्वापि सर्वपापै: प्रमुच्यते अश्वमेधस
हस्रस्य राजसूयशतस्य च १५ पुंडरीकायुतस्यापि फलपाक:

प्रजायते यवतः सर्वभावेन सर्वास्तु। सिद्धयः करे १६ जाय
ते महदैश्वर्यं सर्वैर्बान्धवैर्नोभवेत् धनस्मारयते वह्निरगा
धो व्याधिः फणायते १७ सिद्धयस्तत्क्षणायंते विषमप्यमृताय
ते हारायंते महासर्प्पाः सिंहः क्रीडामृगायते १८ दासायंते
महीपाला जगन्मित्रायतेऽखिलं तस्मान्नाम्नां सहस्रेण स्तु
ता सा जगदंबिका १९ प्रयत्याखिलान् कामान् देहांते परमां गतिं
इदं सर्वमधीयानो दौष्यन्तिर्भरतः श्रियै २० जिगाय पृथिवीं सर्वां
रथेनैकेन षड्दिनात् आजहाराश्वमेधानां सहस्रद्वितयं नृपः
२१ एकैकस्मिन्नश्वमेधे गुरवे दक्षिणाकृते सहस्रं यत्र पद्मा
नां कण्वाय भरतो ददौ २२ पंचलक्षाणि वर्षाणां बुभुजे मेदि
नीं पुरा पंचाशीतिसहस्राणि भार्याणां तस्य चाभवन् २३ मांधा
तृप्रमुखाश्चान्ये नृपाः सिद्धिं प्रपेदिरे उद्दालकप्रभृतयो मुनय

वा॰स॰
९
९

श्रवणान्नेन २४ गुरौ किंनु प्रकर्त्तव्या भक्तिरव्यभिचारिणी गुरु
भक्तिमृते नैव सिद्ध्यन्तीति निजवोदितं २५ यथा देवे तथा मंत्रे य
था मंत्रे तथा गुरौ भक्तिः कार्या निष्कपटा सद्यः सिद्धिमभीप्सता
२६ एतत्सर्वं मया देवि समासात्कथितं नव गोप्यं प्रयत्नतस्तत्र
प्रमाणं वचनं मम २७ ध्येया रक्ष्या च वाराही पठ्यं नाम सहस्रकं
सर्वसिद्धिकरे काम्ये सत्यं सत्यं नवोदितं १२८ नमो भगवत्यै
नमो नारायण्यै च ॥ इति श्री उड्डामरतंत्रे देवदेवीसंवादे वा
राहीसहस्रनामस्तोत्रं संपूर्णम् शुभमस्तु संवत् १८३७ वै
शाखशुक्लपंचम्यां शुक्रे पुनर्वसौ गंडे ज्येष्ठ प्रविष्टे ३ श्रीकर्म
चंद चौधरी सुधासरनिवासिनेन तदात्मजे ज्योतसी राधाराम द
त्तीसेठ लालवाउन लिखित्वा समर्पितमिदं वाराहीसहस्रनाम
श्रीरघुनाथमंदिरे श्री महाराजानां पुस्तकालये निहालचंद गण
पतिहसो काशीविश्वेश्वरायनमः ॥ जंबूराजधान्यां जन्मसंवत्सरः राम
नेस दप प्रमाणः
९